Sl.No. :

नामांक Roll No.

No. of Questions – 23

No. of Printed Pages – 7

# VU–94–Sans. Vangmay

# वरिष्ठ उपाध्याय परीक्षा, 2023

## संस्कृत वाङ्मय (अनिवार्य:)

समय : 3 घण्टे 15 मिनट (सपाद होरात्रयम्)

पूर्णांक : 80

**परीक्षार्थिभ्य: सामान्यनिर्देशा:**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क: अनिवार्यत: लेख्या: ।

2) सर्वे प्रश्ना: अनिवार्या: ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागा: एकत्र एव लेखनीया: ।

5) सर्वे प्रश्ना: संस्कृतमाध्यमेन उत्तरणीया: ।

## खण्डः – 'अ'

1) वस्तुनिष्ठप्रश्नाः–

i) ''गणपतेर पत्यादि'' इति विग्रहे रुपं भवति – [1]

अ) गाणपतम्
ब) आदित्यः
स) प्राजापत्यः
द) शैवः

ii) ''उत्सादिभ्योऽञ्'' इति सूत्रम् अस्ति – [1]

अ) गणसूत्रम्
ब) संज्ञासूत्रम्
स) विधिसूत्रम्
द) अधिकारसूत्रम्

iii) ''लः परस्मै पदम्'' इति सूत्रेण का संज्ञा भवति? [1]

अ) पद संज्ञा
ब) घु संज्ञा
स) आत्मनेपद संज्ञा
द) परस्मैपद संज्ञा

iv) ''कर्तरिशप्' इति सूत्रेण कः प्रत्ययो भवति? [1]

अ) अप्
ब) शप्
स) अम्
द) तम्

v) शिववीरः निवसति स्म – [1]

अ) प्रतापदुर्गे
ब) जयदुर्गे
स) सिंहदुर्गे
द) रक्तदुर्गे

vi) ''शिवराजविजयः'' कति विरामेषु विभक्तः अस्ति ? [1]

अ) षट्सु
ब) पञ्चसु
स) त्रिषु
द) चतुर्षु

vii) ''यः सुचरितैः पितरं प्रीणयेत्'' सः कः? [1]

अ) पुत्रः
ब) मित्रः
स) सज्जनः
द) नरः

viii) सद्विद्या यदि किं ..........? [1]

अ) पातकैः

ब) तपसा

स) अगुणेन

द) धनैः

ix) मनुष्यस्य नाम विद्यते – [1]

अ) प्रमदा

ब) मनुजः

स) कन्या

द) भगिनी

x) मातुः पिता – [1]

अ) पितामहः

ब) श्वशुरः

स) मातामहः

द) भ्रात्रीयः

xi) ज्योतिषशास्त्रम् अस्ति – [1]

अ) काल विधायकम्

ब) सूचना विधायकम्

स) विधि विधायकम्

द) संज्ञा विधायकम्

xii) कति वाराः? [1]

अ) नव

ब) दश

स) सप्त

द) एकादश

2) रिक्तस्थानानि प्रपूरयत् –

i) "तेन रक्त ............ ।" [1]

ii) मणिना भूषितः ........... किमसौ न भयङ्करः । [1]

iii) "क एष मामनुत्तरयन् मुमुर्षुः ............. बधिरः।" [1]

iv) .......... प्रथमः । [1]

v) वीरपत्नी वीरभार्या ......... च वीरसूः । [1]

vi) कर्कस्वामी च ............ । [1]

**3)** अतिलघूत्तरात्मकप्रश्ना:

i) "शुक्राद्घन्" इति सूत्रेण क: प्रत्ययो भवति? [1]

ii) "प्रावृषेण्य:" इत्यत्र प्रत्यय विधायकं सूत्रं लिखत । [1]

iii) 'भू' धातो: कोऽर्थ:? [1]

iv) गोपीनाथपण्डित: कस्य राजदूत: आसीत्? [1]

v) "शुचिमनो यद्यस्ति तीर्थेन किम्" इत्यस्य भावार्थ: क:? [1]

vi) "सदसि वाक्पटुता" इत्यस्य भावार्थो लेख्य: । [1]

vii) पुत्रस्य नाम द्वयं लिखत । [1]

viii) "पितामह:" इत्यस्य अर्थं लिखत । [1]

ix) अमरकोषस्य अपरंनाम किम्? [1]

x) अहोरात्रे कति प्रहरा: भवन्ति? [1]

xi) सिंहस्यधिपति क:? [1]

xii) ज्योतिषशास्त्रानुसारं सम्पूर्णब्रह्माण्डे कति ग्रहा: सन्ति? [1]

## खण्ड: - 'ब'

4) "दाक्षि:" इति प्रयोगं साधयत । [2]

5) "काकम्" इति प्रयोगं साधयत । [2]

6) "गार्ग्य:" इति प्रयोगं साधयत । [2]

7) "दन्त्यम्" इति प्रयोगं साधयत । [2]

8) "भवसि" इति प्रयोगं साधयत । [2]

9) "भविष्यति" इति प्रयोगं साधयत । [2]

10) "लुट:प्रथमस्य डारौरस:" इति सूत्रं व्याख्येयम् । [2]

11) शिवराजविजयस्य रचनाकारस्य सामान्यपरिचयो लेख्य: । [2]

12) भर्तृहरे: परिचयात्मकवाक्यद्वयं लिखत । [2]

13) मातु: चत्वारि नामानि लिखत । [2]

14) पत्यु: चत्वारि नामानि लिखत । [2]

15) तिथिनामानि लिखत । [2]

16) एकस्मिन् वर्षे कति मासा: भवन्ति? नामानि लिखत । [2]

## खण्डः – 'स'

17) अधोलिखितेषु कयोश्चित् द्वयोः सूत्रयोः व्याख्या कार्या । [3]

क) "शिवादिभ्योऽण्"

ख) "मध्यान्मः"

ग) "संख्याया अवयवे तयप्"

घ) "क्रमादिभ्यो वुन्"

18) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । [3]

क) आरम्भगुर्वी क्षयिणी क्रमेण,
लघ्वी पुरा वृद्धिमतीच पश्चात् ।
दिनस्य पुर्वार्द्ध–परार्द्ध भिन्ना,
छायेव मैत्री खल–सज्जनानाम् ।।

ख) श्रोतं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां,
परोपकारैर्न तु चन्दनेन ।।

19) अधोलिखितेषु वाक्येषु केषाञ्चित् त्रयाणां संस्कृतानुवादो विधेयः । [3]

क) गाँव के दोनों ओर जल है ।

ख) उसे पढ़ना चाहिए ।

ग) जटा से सन्यासी ज्ञात होता है ।

घ) वृक्ष से पत्ता गिरा ।

ङ) विद्या से ज्ञान होता है ।

च) देवदत्त पाठ पढ़ेगा ।

20) अधोलिखितेषु केषुचित् त्रिषु वाक्येषु रेखाङ्कितपदानि संशोधयत । [3]

क) <u>द्वौ</u> बालकाः ।

ख) <u>नृपात्</u> वसुधां याचते ।

ग) <u>नेत्रस्य</u> काणः ।

घ) <u>बालकं</u> मोदकं रोचते ।

ङ) नमः <u>जनकम्</u> ।

च) सः पुस्तकं <u>पठन्ति</u> ।

## खण्डः – 'द'

21) अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ । [4]

क) शिखावलः ।

ख) सामाजिकः ।

ग) रैवतिकः ।

घ) वैयाकरणः ।

22) अधोलिखितयोः गद्यांशयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । [4]

क) ततः संवृत्ते किञ्चिदन्धकारे धूप – धूमेनेव व्याप्तासु हरित्सु भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत – प्रत्यागतश्च विदधानः, प्रतापदुर्ग – दौवारिकः, कस्यापि पादक्षेपध्वनिमिवाऽश्रौषीत् ।

ख) गौरसिंह : – "अवगतः तत्पत्रमेव दर्शयामि" इति व्याहृत्य, उष्णीष सन्धौ स्थापितं कन्यापहारक – यवन – मृत – शरीरावस्त्रान्तः प्राप्तं पत्रं बहिश्चकार । सर्वेच विजयपुराधीशमुद्रामवलोक्य किमेतत्? एतत्? कथमेतत्? कस्मादेतत्? इति विज्ञासमानाः सोत्कण्ठा वितस्थिरे ।

23) अधोलिखितेषु कमप्येकं विषयमाश्रित्य निबन्धोलेखनीयः । [4]

क) मम प्रियः कविः

ख) परोपकारः

ग) संस्कृतं संस्कृतिस्तथा

घ) अस्माकं विद्यालयः